# Shakrakrita Shri Ganesha Stuti

# शाक्रकृता श्रीगणेशस्तुतिः

## Document Information

Text title : Shakrakrita Shri Ganesha Stuti

File name : gaNeshastutiHshakrakRRitA.itx

Category : ganesha, gaNeshapurANa, stuti

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM krIDA (uttara)khaNDaH | adhyAyaH 11 | 2.11 26-46||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# शक्रकृता श्रीगणेशस्तुतिः

शक्र उवाच ।
भूभारहरणार्थं यो जातः कश्यपनन्दनः ।
अचिन्त्यो महिमा यस्य किमु वर्ण्यो भवेन्मम ॥ २६॥

निर्गमं देहि देवेश ! कुक्षेरत्यन्तविस्तरात् ।
अदृष्टपाराद् वर्षाणि द्वादश भ्रमता मया ॥ २७॥

तव कुक्षौ मयाऽदर्शि भुवनानि चतुर्दश ।
स्थाने स्थाने विभक्तानि प्रतिरोमाञ्चमेकराट् ॥ २८॥

समष्टिव्यष्टिरूपाणि महाविस्तारवन्ति च ।
दृष्टानि तव रूपाणि सुसौम्यानीतराणि च ॥ २९॥

अद्भुतान्यप्यसङ्ख्यानि वक्त्राणि नयनानि च ।
दृष्ट्वा दुर्दर्शरूपाणि जगत्क्षोभकराणि ते ॥ ३०॥

दैत्यदानवपूर्णानि सुरमानववन्ति च ।
यक्षरक्षःपिशाचादिचतुराकरवन्ति च ॥ ३१॥

विकरालमहोरूपमुपसंहर विश्वकृत् ! ।
गतो मोहं स्मृतिर्लब्धा प्रसादान्निखिलेश्वर ॥ ३२॥

कायेन मनसा बुद्ध्या वाचा त्वां शरणं गतः ।
प्राकृतं दर्शय विभो ! रूपं ते भक्तवत्सल ॥ ३३॥

क उवाच ।
एवं यावत् प्रार्थयते स्वात्मानं तावदेव सः ।
सभामध्यगतं तं चददर्श ब्रह्मचारिणम् ॥ ३४॥

पश्यतां सर्वलोकानां साष्टाङ्गं प्रणनाम तम् ।
अतिविस्मितचित्तोऽसौ लज्जाहर्षसमन्वितः ॥ ३५॥

शृण्वस्तु सर्वदेवेषु नुनाव ब्रह्मचारिणम् ।
जातं मुनिगृहे शान्तं क्रीडामानुषरूपिणम् ॥ ३६॥

शक्र उवाच ।
जाने न त्वाऽनन्तशक्तिं परेशं विश्वात्मानं विश्वबीजं गुणेशम् ।
विश्वाभासं विश्ववन्द्यं त्रिसत्यं त्रेधाभूतं जन्मरक्षार्तिहेतुम् ॥ ३७॥

एकं नित्यं सच्चिदानन्दनरूपं सर्वाध्यक्षं कारणातीतमीशम् ।
चेष्टाहेतुं स्थावरे जङ्गमे च वाञ्छापूरं सर्वगं त्वाऽभिवन्दे ॥ ३८॥

सर्वेशानं सर्वविद्यानिधानं सर्वात्मानं सर्वबोधावभासम् ।
सर्वातीताऽवाङ्मनोगोचरं त्वां सर्वावासं सर्वविज्ञानमीडे ॥ ३९॥

क उवाच ।
एवं स्तुत्वा च नत्वा च सम्पूज्य स्वाङ्कुशं ददौ ।
कल्पवृक्षं चदास्यौ द्वे विनायक इति स्फुटम् ॥ ४०॥

चकार नाम शक्रोऽथ स्मरणात् सर्वसिद्धिदम् ।
जयशब्दैर्नमःशब्दैर्वाद्यशब्दैरनेकधा ॥ ४१॥

गन्धर्वगीतनिनदैरप्सरोनृत्यनिस्वनैः ।
व्याप्तमासीत् पुष्पवर्षैस्तदा व्योम धरातलम् ॥ ४२॥

प्रतिकूलवहा नद्य आसन् पूर्ववहाः शुभाः ।
प्रसन्नमासीद् दिक्चक्रं ववुर्वाताः सुखावहाः ॥ ४३॥

प्रदक्षिणार्चिषः शान्ता आसन् सर्वत्र वह्नयः ।
ततः प्रसन्नः शक्राय ददावभयमेकराट् ॥ ४४॥

भविता न भयं क्वापि तव शक्र ! रणाजिरे ।
पठस्व स्तोत्रमेतत् त्वं त्रिसन्ध्यं भक्तितत्परः ॥ ४५॥

अन्योऽपि यः पठेद् भक्त्या श्लोकत्रयमिदं नरः ।
स सर्वानाप्नुयात् कामान् सर्वत्र विजयी भवेत् ॥ ४६॥

इति शक्रकृता श्रीगणेशस्तुतिः सम्पूर्णा ॥

- ॥ श्रीगणेशपुराणं क्रीडा (उत्तर)खण्डः । अध्यायः ११ । २.११ २६-४६॥

- .. shrIgaNeshapurANaM krIDA (uttara)khaNDaH . adhyAyaH 11 . 2.11 26-46..

Proofread by Preeti Bhandare

*Shakrakrita Shri Ganesha Stuti*
pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*